विषयस्तं प्रश्नविषयमतिक्रान्तो गार्ग्याः प्रश्नः आनुमानिकत्वात्त यस्या देवतायाः प्रश्नः सातिप्रश्न्या नातिप्रश्न्यां अनतिप्रश्न्यां स्वप्रश्नाविषयैव केवलागमगम्येत्यर्थः । तामनतिप्रश्न्यां वै देवतामतिपृच्छसि अतो गार्गि ! मातिप्राक्षीर्मा ते मूर्द्धा व्यपप्तदिति ततो ह गार्गी वाचक्नव्युपरराम" भा० ।

**ओतु** पुंस्त्री अव–तुन् ऊठ् गुणः । १विड़ाले मार्ज्जारे । आ+वे–तुन् बा० संप्रसारणम् (पड्यानसुते) तिरश्चीनसूत्रे । "नाहं तन्तुं न विजानाम्योतुम्" ऋ०६,९,२ । "तन्तवः पटस्य प्रागायतानि सूत्राणि"ओतवस्तिरश्चीनानि सूत्राणि" भा० । अत्र रूपकतया वियदादीनां विस्तीर्य्यमाणत्वात् ओतुत्वं यथा तत्रैव भाष्ये "वैश्वानरस्य पुत्रोऽसौ परस्ताद्दिवि यः स्थितः । छन्दांस्यध्वरवत्तस्य स्तुतशस्त्राणि तन्तवः । यजूंषि श्वेष्टाश्चोतु स्यादस्तं वातव्यमध्वरः" औतुमोतून् पञ्चीकृतानि स्थूलानि ओतुस्थानीयान्यपि वियदादीनि" भा० । "ये अन्ता यावतो सिचो य ओतवो ये च तन्तवः । वासोयत्पत्नीभिरुतं तन्नः स्योनमुपस्पृशात्" अथ०१४,२,५१ । समासेऽवर्णात्परस्यास्या दैवां पररूपम् स्थूलौतुः स्थूलोतुः ।

**ओदती** स्त्री उषसि–निरु० । "नदं व ओदतीनाम्"ऋ० ८,७९,२ । "ओदतीनाम् ओदत्यः उषसः तासाम्" भा०

**ओदन** पु० उन्द–युच् नलोपो गुणश्च । १मेघे निघ० । २भक्ते खिन्नान्ने अर्द्धर्चादि० पुं०न० । "अन्नेन व्यञ्जनम्" पा० स० गुडोदनः घृतोदनःदध्यौदन इत्यादि मिश्रीकरणद्वारा सामर्थ्यम् । "गुड़ोदनं पायसं च हविष्यं क्षीरषष्टिकम् । दध्योदनं हविस्सूप्यं मांसं चित्रान्नमेव च" या० स्मृतिः गुडमिश्र ओदनः गुडौदन एवं दध्योदनः हविर्घृतौदनः" मिता०ततो हितादौ छ यत् वा । ओदनीय ओदन्य ओदनसाधने तण्डुलादौ । "असौ लमज्ञाप्यमखण्डिताखिलं विमुक्तमन्योन्यकणुक्रमार्द्दवम् । रसोत्तरं गौरमपीवरं रसादभुङ्क्तामोदनमोदनं जनाः" नैषधे अन्नवर्णने "अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च"मनुः

**ओदनपाकी** स्त्री ओदनस्य पाक इव पाको यस्याः ङीष् । १नीलझिण्टिकायाम् । २ओषधिभेदे शब्दार्थच० ।

**ओदनाह्वया** स्त्री ओदनस्याह्वय आह्वयो यस्याः । महासमङ्गायां (वेलियाड़ा) राजनि० ।

**ओदनी** स्त्रीओदन इवाचरति ओदन+आचारे क्विप्-ततः अच् गौरा० ङीष् । (वेलेड़ा) वलायाम् ।

**ओद्म** पु० उन्द–क्लेदने भावे मन् नि० । उन्दने क्लेदने ।

**ओद्मन्** त्रि० उन्द–मनिन् नलोपश्च । ओषधौ । "अपांत्वोद्मन् सादयामि" यजु०१३,५३ । अपान ओद्मन् ओद्मनि ओषधौ, भा० सप्तम्या लुकि नलोपाभावः ।

**ओम्** अव्य०अव–मन् नि० । १प्रणवे, २आरम्भे, ३स्वीकारे, "ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभः" माघः । ४अनुमतौ, ५अपाकृतौ, ६अस्वीकारे, मङ्गले, ७शुभे, ८ज्ञेये, ब्रह्मणि च । अश्च उश्च मश्च तेषां समाहारः । विष्णुमहेश्वरब्रह्मरूपत्वात् ९परमेश्वरे अव्य० यथा तस्येश्वरवाचकता तथा पात०सूत्र भा०विवरणेषु दर्शितं यथा

"तस्य वाचकः प्रणवः" सू० । "वाच्य ईश्वरः प्रणवस्य, किमस्य सङ्केतकृतं वाच्यवाचकत्वम् ? अथ प्रदीपप्रकाशवदवस्थितमिति । स्थितोऽस्य वाच्यस्य वाचकेन सह सम्बन्धः, सङ्केतस्त्वीश्वरस्य स्थितमेवार्थमभिनयति । यथावस्थितः पितापुत्रयोः सम्बन्धः, सङ्केतेनावद्योत्यते अयमस्य पिता, अयमस्य पुत्र इति । सर्गान्तरेष्वपि वाच्यवाचकत्वापेक्षस्तथैव सङ्केतः क्रियते" भा० ।

"सम्प्रति तत्प्रणिधानं दर्शयितुं तस्य वाचकमाह, तस्य वाचकः प्रणवः । व्याचष्टे, वाच्य इति । तत्र परेषां मतं विमर्षद्वारेणोपन्यस्यति, किमस्येति वाचकत्वं प्रतिपादकत्वम् इत्यर्थः । परे हि पश्यन्ति, यदि स्वाभाविकः शब्दार्थयोः सम्बन्धः सङ्केतेनास्माच्छब्दादयमर्थः प्रत्येतव्य इत्येवमात्मकेनाभिव्यज्येत ततो यत्र नास्ति स सम्बन्धस्तत्र सङ्केतशतेनापि न व्यज्येत न हि प्रदीपव्यङ्ग्योघटो यत्र नास्ति तत्र प्रदीपसहस्रेणापि शक्यो व्यञ्जयितुम् । कृतसङ्केतस्तु करभशब्दोवारणे वारणप्रतिपादकोदृष्टः सङ्केतकृतमेव वाचकत्वमिति विमृश्याभिमतमवधारयति, स्थितोऽस्येति । अयमभिप्रायः सर्व एव शब्दा सर्वाकारार्थाभिधानसमर्था इति स्थित एवैषां सर्वाकारैरर्थैः स्वाभाविकः सम्बन्धः । ईश्वरसङ्केतस्तु प्रकाशकस्य नियामकस्य, तस्य ईश्वरसङ्केतासङ्केतकृतस्यास्य वाचकापभ्रंशविभागस्तदिदमाह, सङ्केतस्त्वीश्वरस्येति । निदर्शनमाह, यथेति । ननु शब्दस्य प्राधानिकस्य महाप्रलयसमये प्रधानभावमुपगतस्य शक्तिरपि प्रलीना ततोमहदादिक्रमेणोत्पन्नस्य वाचकस्येव माहेश्वरेण सङ्केतेन न शक्या वाचकशक्तिरभिज्वलयितुं विनष्टशक्तित्वादित्यत आह, सर्गान्तरेष्वपीति । यद्यपि सह शक्त्या प्रधानसाम्यमुपगतः शब्दस्तथापि पुनराविर्भावे